श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

कवितार्किकसिंह सर्वतन्त्रस्वतन्त्र
श्रीमद्वेदान्तदेशिक विरचितं महाकाव्यं

# ॥ यादवाभ्युदयम् ॥

## ॥ द्वाविंशः सर्गः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ यादवाभ्युदयम् ॥

## ॥ द्वाविंशः सर्गः ॥

अथ देवानिवाहूतान्नरदेवानभाषत।
देवदानवसामान्यदैवतं देवकीसुतः॥ २२.१ ॥

एष वः क्ष्मापतिः शास्ति विधातेव प्रजापतीन्।
महेन्द्र इव धर्मेण सुधर्मामास्थितः स्वयम्॥ २२.२ ॥

शेखरीकृतभूभारः शेषत्वेन विभोः स्थितः।
वेदयत्ययमार्योऽपि मित्रभूतानमित्रजित्॥ २२.३ ॥

वयं भवन्तो ये चान्ये महान्तः सर्व एव ते।
विश्वगुप्तौ जगत्कर्त्रा विनियुक्ता विभूतयः॥ २२.४ ॥

तदस्माभिरवस्थेयं धर्मवर्त्मनि शाश्वते।
बिभ्यद्भिरनघादेशाद्वज्रादिव समुद्यतात्॥ २२.५ ॥

द्विषन्तः ख्यातनामानो नामशेषास्तथाऽप्यसौ।
समुद्रवसना विष्वक् तामसैरवकुण्ठिता॥ २२.६ ॥

अंसकस्तूरिका भूमिर्भवतां बाहुशालिनाम्।
अजुगुप्सापदं न स्यादसद्वृत्तिमलीमसा॥ २२.७ ॥

शङ्कितप्रचयः शेषः शत्रूणां शुष्मणामिव।
आयतौ सुखमिच्छद्भिर्न युक्तः क्षन्तुमीश्वरैः॥ २२.८ ॥

अतस्त्राणाय साधूनां दुष्कृतां दमनं क्षमम्।
कडङ्करीयरोधो हि कलमात्सेधकारणम्॥ २२.९ ॥

पुष्यतां पाण्डरं छत्रं पुण्डरीकमिव श्रियः।
धर्मोऽधर्मश्च नान्योऽस्ति रक्षणोपेक्षणे भुवः॥ २२.१० ॥

पूर्वपूर्वनरेन्द्राणामुच्छिष्टमपि मेदिनी।
सोमपीथिनयाद्ग्राह्या स्वधर्माध्वरमास्थितैः॥ २२.११ ॥

अविवेकविभावर्यां धर्ममार्गमपङ्किलम्।
द्रष्टुं दीप इव न्यस्तो नायकेन नयागमः॥ २२.१२ ॥

अवलम्ब्य जगद्धातुर्हस्तमागमविग्रहम्।
स्वयमुद्धरतात्मानं स्वैरं पातालपातिनम्॥ २२.१३ ॥

व्यसनासारवेगानां वारणं न प्रकल्पते।
उपदेशैरनार्याणामुत्तानच्छत्रसन्निभैः॥ २२.१४ ॥

पण्डितप्रहतेनैव सत्पथेन सदोदिताः।
विषमेषु स्खलन्तोऽपि न दुर्गतिमवाप्स्यथ॥ २२.१५ ॥

भूपरिक्रमणादन्या भवतामतिभास्वताम्।
तमसामिव शत्रूणां निरासे कीदृशी क्रिया॥ २२.१६ ॥

जिगीषूणां च युष्माकं न जेतव्यपदे स्थितम्।
कौरवैरनुकूलानां विपाकैरिव कर्मणाम्॥ २२.१७ ॥

अवरोध्याः स्वयं दक्षैरक्षिपद्भिरनेहसम्।
करिणां कर्णडोलाभिः कम्पिता इव सम्पदः॥ २२.१८ ॥

नीतिपद्धतिरक्षोभ्या भवद्भिरधिगम्यताम्।
नियता स्वर्गसौधस्य निः श्रेणिरिव शाश्वती॥ २२.१९ ॥

खलत्यागः सुहृत्प्राप्तिरितीदं कवचद्वयम्।
वहध्वं मन्त्रदेहस्य भेदं परिजिहीर्षवः॥ २२.२० ॥

धातूनामिव कोपेषु प्रकृतीनामचेतसाम्।
पातुमर्हथ पर्याप्तं प्रसादनरसायनम्॥ २२.२१ ॥

अनीतिमदिरां त्यक्त्वा लोभादिविषदूषिताम्।
अगदङ्कारमादद्ध्वं प्रज्ञाऽमृतमनुत्तमम्॥ २२.२२ ॥

लुलिताशेषसन्मार्गं लोकवेदविरोधिनम्।
परित्यजत दुर्मानं पाषण्डमतजीवितम्॥ २२.२३ ॥

गुणशैलाग्रमारोप्य शनैरात्मानमात्मना।
नित्यशङ्कितविभ्रंशं निध्यायत शुभंयवः॥ २२.२४ ॥

त्रिविधानि विधेयानि सम्पत्सु च विपत्सु च।
करणानीव मित्राणि गोपायत गुणग्रहात्॥ २२.२५ ॥

अप्रशान्तेषु विस्रम्भमतिशङ्कां सुहृत्सु च।
नीतिसन्दंशिना ऋद्धेः समुद्धरत कण्टकौ॥ २२.२६ ॥

सपञ्चाङ्गेन मन्त्रेण नीतिमाहात्म्यनिर्विषाम्।
नियच्छत निजाङ्गेषु भुजङ्गीमिव सम्पदम्॥ २२.२७ ॥

अवधीरयताधर्म्यामर्थकामैकसाधिकाम्।
नृशंसप्रेयसीं नीतिं नारिहृदयदारुणाम्॥ २२.२८ ॥

प्रमादसप्तकं त्यक्त्वा प्रबुध्योपायसप्तकम्।
अङ्गसप्तकसम्पत्त्या जयत द्वीपसप्तकम्॥ २२.२९ ॥

अरातिगणकूटस्थानादौ जयत दुर्जयान्।
अपदक्रोधलोभादीनशेषार्थविरोधिनः॥ २२.३० ॥

आन्तरेण बलेनैव द्विविधां वहत क्षमाम्।
यस्य सत्त्वेऽप्यसत्त्वेऽपि गतार्थं षड्विधं बलम्॥ २२.३१ ॥

न शापो नाभिचरणं न वह्निर्न विषं तथा।
नास्त्राणि न च शस्त्राणि यथा तीक्ष्णतमा क्षमा॥ २२.३२ ॥

विपक्षजातिभाजोऽपि क्षुद्राननपकुर्वतः।
सुपर्ण इव भूनागानुपेक्षध्वं तरस्विनः॥ २२.३३ ॥

कृपणान् क्षममाणोऽपि महासत्त्वो न दैन्यभाक्।
मृगेन्द्र इव भिन्नेभः स्वदंष्ट्रालेहिनः खगान्॥ २२.३४ ॥

देवानतिशयानानां दैत्यदानवरक्षसाम्।
विनिपातनिदानानि स्वयमन्वीक्ष्य सुख्यत॥ २२.३५॥

यशःप्राणहरान् घोरान् व्यामोहविषपादपान्।
समीक्षाशाणघृष्टेन द्यत शास्त्रेण शस्त्रिणः॥ २२.३६॥

श्रुतशालिभिरुक्तानि दुरुत्सेकज्वरातुराः।
अप्रियाण्यपि पथ्यानि मा जिहासत जातुचित्॥ २२.३७॥

कलिसन्धिसमाघ्रातं त्यजन्तः कर्म कर्बुरम्।
सदसत्प्रेक्षणे स्यात सर्वतो दत्तदृष्टयः॥ २२.३८॥

पल्लवोपमकौमारे प्रसूनोपमयौवने।
स्थिरं फलमुपादद्ध्वं जङ्गमे जीवितद्रुमे॥ २२.३९॥

मिषतां मीलतां वाऽपि द्रुतं धावति जीविते।
अनघं तनुत क्षेम्यमान्तरं धनमक्षयम्॥ २२.४०॥

अकालनियतोच्छ्रायमतिसूर्येन्दुपावकम्।
क्षात्रं क्षपितजाड्यं वः क्षमं तेजः समेधितुम्॥ २२.४१॥

असम्प्लावितसप्ताब्धिरत्रिलोकीतमोपहा।
अदिक्सूतसुधालिप्तिर्यस्य कीर्तिः स किम्प्रभुः॥ २२.४२॥

सुधां सुमनसो यस्य स्वादयन्ति यशोमयीम्।
स राजा वृद्धिमाप्नोति क्षीयते न च कालतः॥ २२.४३॥

त्यक्तसान्त्वेन कठिनान्विद्रावयत तेजसा।
अयसस्तापसेकाभ्यामवस्था कीदृशी भवेत्॥ २२.४४॥

प्रसाधितदिशो युष्मान् विमुक्तान्यमहीभृतः।
सम्पदः प्रतिपत्स्यन्ते सरितः सागरानिव॥ २२.४५॥

स एष पुरतो याता प्राज्ञः परिभृशन् पथः।
सङ्कल्प इव युष्माकं सात्यकिः सत्यविक्रमः॥ २२.४६॥

परिवारेण सम्पन्नस्त्यक्तकोशश्च कार्यतः।
नन्दकोऽयमनिस्त्रिंशः सम्मतो मम शत्रुजित्॥ २२.४७ ॥

जैत्रं ध्वजमिवोदग्रमेनमाहितलक्षणम्।
अनुयात दिशो जेतुमस्त्रवेदमिवापरम्॥ २२.४८ ॥

वनसिंहनयाद्गुप्तिर्मानतर्कक्रमादपि।
परस्परपुरस्काराद्भवित्री भवतामिह॥ २२.४९ ॥

अपि युष्माभिरेतावदहङ्कारग्रहोज्झितैः।
अङ्गीकृतममुह्यद्भिरातुरैरिव भोजनम्॥ २२.५० ॥

इति सूक्तिसुधां पीत्वा शौरिवक्त्रेन्दुनिः सृताम्।
सहसा नरदेवास्ते सौमनस्यं प्रपेदिरे॥ २२.५१ ॥

तदुक्तिं शुकवत् सर्वे सँलपन्तः परस्परम्।
प्रहर्षमदधुस्तस्य प्रविष्टा नीतिपञ्जरम्॥ २२.५२ ॥

तृषितैरिव ते श्रोत्रैः सम्भृतश्रुतिसौरभाम्।
पपुः प्रियहितां तस्य परिशुद्धां सरस्वतीम्॥ २२.५३ ॥

असन्देहविपर्यासामसङ्कीर्णहिताहिताम्।
त्रयीमिव गिरं तस्य मानयन्ति स्म ते नृपाः॥ २२.५४ ॥

अथ यादवयूथेन सहितः संयुगप्रियः।
सात्यकिः प्रचितोत्तंसः प्रतस्थे भर्तुराज्ञया॥ २२.५५ ॥

धर्मगुप्तिकृतादेशः स मेने मधुवैरिणा।
अपृथक्त्वमिवापन्नमन्यदायुधपञ्चकम्॥ २२.५६ ॥

स्वकेतुकल्पनापूर्वं नियुक्तं हरिणा स्वयम्।
तमेव तादृशाकारं तममन्यन्त यादवाः॥ २२.५७ ॥

स वीरः शासनं भर्तुः शिरस्त्राणमिवोद्वहन्।
अमन्यत जितप्रायाः सह दिक्पतिभिर्दिशः॥ २२.५८ ॥

पयोधिं तर्णकपदं पर्वतं सिकतामयम्।
पातालं च स्थलीपृष्टं प्रैक्षतामितविक्रमः॥ २२.५९ ॥

प्रयाणपटहस्तस्य प्रलयाम्बुदडम्बरः।
नूनमानर्तयामास भुवं सह पयोधिभिः॥ २२.६० ॥

प्रयान्ती पृतना सद्यः प्रणादैर्द्यामपूरयत्।
वैरिवासकसज्जानां गणैरप्सरसामपि॥ २२.६१ ॥

अधिरुह्य रथं जैत्रं स बभौ तार्क्ष्यसन्निभम्।
जिगीषितदिशाचक्रश्चक्रपाणिरिवापरः॥ २२.६२ ॥

दिव्यदुन्दुभिघोषेण पुष्पवर्षेण भूयसा।
अशरीरिजयोक्त्या च तेन जज्ञे जितं जहत्॥ २२.६३ ॥

स विष्णुरिव विक्रान्त्या बलिध्वंसोद्यतो बली।
सुषुवे त्रिषु लोकेषु कीर्तिं त्रिपथगामिव॥ २२.६४ ॥

ततो बुद्बुदफेनाभैः प्रचितां छत्रचामरैः।
निनाय पृतनां प्राचीं गङ्गामिव भगीरथः॥ २२.६५ ॥

पृतनासागरौघेन पालयन् सागराम्बराम्।
वीरो वेतसवृत्तीनां न भङ्गमभिसन्दधे॥ २२.६६ ॥

महद्भिरपि तत्सैन्ये सम्पतद्भिः सुहृद्बलैः।
न वृद्धिरभवद्दृश्या वर्षतोयैरिवाम्बुधौ॥ २२.६७ ॥

अशोभत पताकाग्रैरग्रहस्तैरनीकिनी।
निर्दिश्य गणयन्तीव जेतव्यविषयान्निजैः॥ २२.६८ ॥

तमीदिवसयोस्तत्र पृथिव्याकाशयोरपि।
समपद्यत तादात्म्यं सैन्यरेणुसमुत्थितम्॥ २२.६९ ॥

असूचीमुखभेद्यं तदचन्द्रार्कप्रतिक्रियम्।
रुरोध द्विषतां दृष्टिं रजसा जनितं तमः॥ २२.७० ॥

अप्रतीपमरुत्क्षिप्तः परागः प्रसरन् पुरः।
आसन्नविनिपातानां वैवर्ण्यमदिशद्द्विषाम्॥ २२.७१ ॥

धूमकम्बलसान्द्रेण रेणुना गगनस्थली।
नमन्तीं सैन्यभारेण शनैरनुजगाम गाम्॥ २२.७२ ॥

पृथिवीं वर्धयन्तीव पृतना खण्डयन्त्यपि।
परागैः पूरयामास खातं सगरजन्मनाम्॥ २२.७३ ॥

ध्वजपल्लविता सेना शस्त्रपुष्पा परागिणी।
बभौ चञ्चूर्यमाणेव मृत्योरुपवनस्थली॥ २२.७४ ॥

सा नूनमनुकुर्वाणा सिन्धुपत्न्यौ सितासिते।
कुटिलप्रतिकूलर्द्धि कूलङ्कषगतिर्ययौ॥ २२.७५ ॥

विश्वतः प्रसृतिस्तस्या बभूव बहुपद्धतेः।
वाहबन्धनकीलानामपर्याप्तवनद्रुमा॥ २२.७६ ॥

अविच्छिन्नगुणांश्चक्रे निस्त्रासान्निजसेनया।
हारानिव भुवः शुद्धानग्रहारान् परार्पितान्॥ २२.७७ ॥

अनाश्रमपदासन्नामभीषितकृषीवलाम्।
अनैषीन्महतीं सेनामविरुन्धान गोपनीम्॥ २२.७८ ॥

स्वदेशादविशेषेण स्वीकृते शत्रुमण्डले।
न योधा जगृहुस्तत्र किञ्चिदस्वामिसम्मतम्॥ २२.७९ ॥

विहारास्तस्य जन्येषु विमतानेव निघ्नतः।
समं ददृशिरे देवैस्तत्तज्ज्ञानपदैरपि॥ २२.८० ॥

अदीनसत्त्वः शत्रूणां दीनसंरक्षणव्रती।
अन्वकम्पत धात्रीभिरुपनीतान् स्तनन्धयान्॥ २२.८१ ॥

अदृष्टसैन्यरजसामबाणस्पर्शवेदिनाम्।
पश्यन् क्वचिदमित्राणां स जिह्राय पलायनम्॥ २२.८२ ॥

स मिथः शौर्यसङ्घर्षादरातीनभिनिघ्नतः।
पुनरुद्दीपयामास सत्कारेण गरीयसा॥ २२.८३ ॥

क्रोधपावकदीप्तानां हेतीनां यदुपुङ्गवाः।
विदधुस्तत्र वैरिस्त्रीबाष्पतोयेन सेचनम्॥ २२.८४ ॥

निहतप्रतिमातङ्गदन्तत्सरुपरिष्कृतान्।
द्विषतां मौलिशाणेषु खङ्गान् मुहुरशातयन्॥ २२.८५ ॥

शस्त्रधाराधरैस्तत्र विक्रमारण्यबर्हिणीम्।
विपुले भुजशैलाग्रे वीरश्रियमनर्तयन्॥ २२.८६ ॥

नियतं हेतयस्तेषां निपीते वह्निवारिणी।
निदधुः शत्रुनारीणां चित्तेषु नयनेषु च॥ २२.८७ ॥

अलभन्त क्षणात्तेषां पुरतः परिपन्थिनः।
धनुषा नमता स्वर्गं वपुषा तु वसुन्धराम्॥ २२.८८ ॥

गूर्जरान् पारशीकांश्च प्रागेव भृतकीकृतान्।
अपश्चात्पदविन्यासानकरोदग्रयायिनः॥ २२.८९ ॥

मध्यदेशं वशीकृत्य योगीव प्रथमं मनः।
प्रत्यन्तबहिरक्षाणि त्याजितार्थान्यथाकरोत्॥ २२.९० ॥

गृहीतचरमाम्भोधीन् गरुत्मानिव जग्रसे।
धन्विनस्तुरगोपेतान् विमुखान् भुजगानिव॥ २२.९१ ॥

यदवस्तत्र निस्त्रासा यवनैः स्तनयित्नुभिः।
शैला इव दधुर्भीमां शरवृष्टिमुदीरिताम्॥ २२.९२ ॥

रक्तचन्दनदिग्धास्ते यशोभिः स्रग्विणस्तदा।
जयश्रीपरिरम्भार्थं नैपथ्यमिव भेजिरे॥ २२.९३ ॥

कपिचूषिततालाभैः कृत्तैर्यवनमूर्धभिः।
ददृशे कालभृत्यानां दत्तपिण्डेव मेदिनी॥ २२.९४ ॥

पीते यवनसैन्याब्धौ तत्कोपबडबाग्निना।
शकाद्याः शरणं जग्मुः शङ्कातङ्केन सात्यकिम्॥ २२.९५॥

प्रवालपल्लवास्तीर्णां रत्नपुष्पौघकर्बुराम्।
विहारपदवीं मेने वेलामपरवारिधेः॥ २२.९६॥

प्रचेतसाऽपि दुष्प्रापैः प्रवालमणिमौक्तिकैः।
तं पोतवणिजस्तत्र प्रभूतैः पर्यतोषयन्॥ २२.९७॥

निर्धूर्तनिगमांस्तत्र नैगमानपरान्तजान्।
स वैद्य इव दुर्व्याधीन् दुर्जयानजयद्विभुः॥ २२.९८॥

विहरन् वारुणीभाजा स वीरो विजयश्रिया।
बभूव बर्बरस्त्रीणां परिदेवनदेशिकः॥ २२.९९॥

उदनह्यन्त वार्ष्णेयाः कुन्तलान् समरश्लथान्।
प्रवालैरपराम्भोधेरान्त्रैरिव समुद्धृतैः॥ २२.१००॥

ततो विलुलितम्लेच्छः पश्चिमोदधिवेलया।
अनिलप्रेयसीमाशाममनुष्यपदं ययौ॥ २२.१०१॥

हारीत हरितैः तत्र महार्घैर्मणिराशिभिः।
गृहीतैरन्वगृह्यन्त तेन पोतोपजीविनः॥ २२.१०२॥

पश्चिमां दिशमाक्रम्य प्राङ्मुखं रथमास्थितम्।
विपरीतगतिं सूर्यमुदीच्यास्तमजानत॥ २२.१०३॥

स कृष्णवर्त्मविहृतिर्युगान्त इव संयुगे।
अमित्रलोकमदहद्दीप्तहेतिगणोल्बणः॥ २२.१०४॥

अनभ्रविद्युत्प्रतिमाः सायकास्तस्य धन्विनः।
अभवन् हूणनारीणामश्रुवर्षपुरः सराः॥ २२.१०५॥

द्विषतो देवदृश्येषु रणरङ्गेषु दीव्यतः।
ताण्डवं ग्राहयामास निपातितशिरोधरान्॥ २२.१०६॥

अपरस्परसापेक्षानतूणीरप्रकाशकान्।
अशंसत्प्रतियोधानप्यवधीरितजीवितान्॥ २२.१०७ ॥

महान्तो मण्डलं चेरुर्मध्येप्रतिबलं द्विपाः।
प्रलयोदन्वदावर्ते भ्रमन्त इव पर्वताः॥ २२.१०८ ॥

तत्र सैन्यरजश्चक्रे प्रतीचीरपि वाहिनीः।
असमाहित बुद्धीनां चित्तवृत्तीरिवाविलाः॥ २२.१०९ ॥

त्रासमुक्तं पुनस्तत्र सिन्धुकाम्भोजयोषिताम्।
अश्रुबिन्दुभिराबन्धि मौक्तिकस्तनमण्डनम्॥ २२.११० ॥

अकृष्टपच्यघुसृणामच्छिन्नौघमहापगाम्।
अघर्मग्लपितारण्यामनघां भुवमन्वभूत्॥ २२.१११ ॥

अश्वीयखुरनिष्पिष्टभूधरक्षोदभूयसा।
राजवीथीसमां चक्रे रजसा वालुकां नदीम्॥ २२.११२ ॥

ग्रामणेरिव तैस्तस्य सैनिकैरवरोधिताः।
स्त्रियः पुरुषधर्माणः स्त्रीत्वमेवोपलम्भिताः॥ २२.११३ ॥

बलेन महताऽऽस्कन्द्य मैनाकपितरं गिरिम्।
प्रलयोदन्वदारोहमाकालिकमलम्भयत्॥ २२.११४ ॥

समाजमिव शैलानां विश्वरूपमिव प्रभुम्।
उत्तम्भनमिव व्योम्नः स निदध्यौ सकौतुकम्॥ २२.११५ ॥

श्वशुरं भूतनाथस्य स्कन्दमातामहं गिरिम्।
प्रसूतिं सर्वरत्नानां पृथिवीधेनुतर्णकम्॥ २२.११६ ॥

गृहीतास्त्याजितत्रासा मेनापतिवनौकसः।
मार्गमादिदिशुस्तस्य वह्नेरिव समीरणाः॥ २२.११७ ॥

तमारुह्य निरैक्षन्त जिघृक्षन्त इवान्धकाः।
विकल्पितरवीन्द्वग्नीन् मेरुकैलासमन्दरान्॥ २२.११८ ॥

दद‍र्श गगनं तत्र दिवाऽपि व्यक्ततारकम्।
गौरीहारमणिप्रख्यैर्गङ्गानिर्झरशीकरैः॥ २२.११९ ॥

सुभगां किन्नरीणां च स्वगुणामोदमेदुराम्।
गीतिं निशामयामास गजशार्दूलकर्षणीम्॥ २२.१२० ॥

गुहासु यमिनां मेने सैन्यघोषमशृण्वताम्।
शृण्वतामपि सिंहानां समं सामिनिमीलनम्॥ २२.१२१ ॥

अपश्यत्तत्र दूरस्थमन्तिकस्थमिवोन्मुखः।
कैलासं किन्नरेन्द्रस्य कीर्तिकन्दमिवोत्थितम्॥ २२.१२२ ॥

चमरान् सिंहशाबांश्च गन्धनाभिमृगानपि।
जगृहुस्तत्र वार्ष्णेयाः प्रियासम्प्रीणनार्थिनः॥ २२.१२३ ॥

गुञ्जाहारभृतः श्यामा बर्होल्लासितकुन्तलाः।
प्रवालवसनाः प्रेक्ष्य जहसुः शबराङ्गनाः॥ २२.१२४ ॥

शिखरांसपरिष्कारैः सैन्यद्विपमदैर्बभौ।
कल्कितः क्ष्माभृतां नाथः कस्तूरीस्थासकैरिव॥ २२.१२५ ॥

श्रुत्वा गिरिगुहानूक्तं तत्सैन्यगजगर्जितम्।
अपि सिंहाः पलायन्त वन्याद्विरदभेदिनः॥ २२.१२६ ॥

प्रदीप्तरत्नशिरसं प्रालेयपरिपाण्डुरम्।
प्रदक्षिणं व्यतीयाय शेषयित्वा महीधरम्॥ २२.१२७ ॥

अथ कस्तूरिकामोदैरधिवासितभूधरान्।
यशसाऽऽवास्य नेपालान् यदुवीरः स्वदेशयत्॥ २२.१२८ ॥

पर्वतेन्द्रप्रतिनिधीन् प्रागुत्तरमहीधरान्।
सुप्रतीकविषाणाग्रैरवैक्षत गवाक्षितान्॥ २२.१२९ ॥

द्वीपपर्वतदुर्गेषु द्विपसिंहनिभान् द्विषः।
सङ्ग्राममृगयास्थायी जग्राह च जघान च॥ २२.१३० ॥

प्रभञ्जन इवाम्भोदान् पक्षीन्द्र इव पन्नगान्।
प्राच्यान् प्रच्यावयामास पञ्चवक्त्र इव द्विपान्॥ २२.१३१ ॥

शोषितप्राच्यजलधिः शौर्यबाडबवह्निना।
ससर्ज तद्वधूचित्तेष्वशोष्यं शोकवारिधिम्॥ २२.१३२ ॥

यदूनां हेतयस्तत्र शत्रुशोणितपाटलाः।
प्रतापज्वलनज्वालासम्पदं प्रतिपेदिरे॥ २२.१३३ ॥

कृपाणिकाभिः कुकुराः कम्पिताभिरकम्पयन्।
द्विषतां तद्वधूनां च चित्तदक्षिणलोचने॥ २२.१३४ ॥

विजह्रुर्यादवास्तत्र विबुधस्त्रीवरप्रदाः।
शराणां लक्षदातारः शत्रुसम्मतविक्रमाः॥ २२.१३५ ॥

यादवास्तत्र शत्रूणां कृत्तेषु नूनमप्रतीन्।
आशातधन्वा दृश्येषु शिरोजालेषु सायकान्॥ २२.१३६ ॥

विक्रमप्रभवे तेषां विजयश्रीस्वयंवरे।
वन्दिकृत्यं द्विषश्चक्रुः स्वर्गयोषित्स्वयंवृतान्॥ २२.१३७ ॥

रमापतिपदोत्पन्नां रत्नाकरपतिंवराम्।
पुण्यां सरितमासीदत्पुरभिन्मौलिमालिकाम्॥ २२.१३८ ॥

स मेने जाह्नवीं यान्तीमर्थमेकमिवार्णवम्।
प्रवाहैर्बहुधा भिन्नैर्भाषाभिरिव भारतीम्॥ २२.१३९ ॥

कृपाणधारातीर्थेन शोधयित्वा कृतागसः।
त्रिदिवं प्रापयामास वङ्गांस्त्रिपथगान्तरे॥ २२.१४० ॥

विक्षिपन् भुवि निस्त्रिंशो वक्त्रपुष्पाणि वैरिणाम्।
रणरङ्गनटस्यास्य सूत्रधार इवाभवत्॥ २२.१४१ ॥

सैन्यदन्तिमदोपेतैः शत्रुस्त्रीबाष्पकज्जलैः।
गङ्गां रविसुतां चक्रे यशसा तां च तन्मयीम्॥ २२.१४२ ॥

आत्तसारा द्विषस्तत्र मुक्तास्तेन महीयसा।
अदृश्यन्त यथापूर्वं दन्तिभुक्तकपित्थवत्॥ २२.१४३ ॥

पृथुवीचिगणां तीर्त्वा पृथिवीसहजां नदीम्।
बाधिताशेषगौडेन बलेनार्णवमाद्रवत्॥ २२.१४४ ॥

अलभन्त महीपालाः पुरतस्तस्य निर्भयाः।
नतेन धनुषा नाकं वपुषा च वसुन्धराम्॥ २२.१४५ ॥

विशन्तो वाहिनीं तस्य त्रिस्रोतसमिवापराम्।
त्रिदिवं प्रत्यपद्यन्त प्रतियोधा निरागसः॥ २२.१४६ ॥

कुटिलान् प्रगुणीकृत्य स्वनामाक्षरभूषितान्।
जङ्गमान् दर्शयामास जयस्तम्भान् महीतले॥ २२.१४७ ॥

शालीनिव सतस्त्रातुं तत्र तत्र प्ररोहतः।
यवसौघनिभान्याप्यानुज्जहार यदूद्वहः॥ २२.१४८ ॥

प्रतापाग्निं पुरस्कृत्य भूयः सागरवाससः।
वेलावलयसम्पन्नं करं जग्राह तत्र सः॥ २२.१४९ ॥

पुरन्दरसमः पूर्वं जित्वा पौरन्दरीं दिशम्।
दीक्षितः सत्परित्राणे दक्षिणाभिमुखोऽभवत्॥ २२.१५० ॥

उपदीकृत्य सर्वस्वमुपसन्नयदूद्वहाः।
प्राचीमविकलामृद्धिमुत्कलाः प्रतिपेदिरे॥ २२.१५१ ॥

प्रहितानथ कालिङ्गैः पन्थानमुपरुन्धतः।
रुरोध सिंहनादेन यदुसिंहः स सिन्धुरान्॥ २२.१५२ ॥

स तान् गैरिकरक्ताङ्गान् सप्तधा स्रुतनिर्झरान्।
जङ्गमानिव विन्ध्यादीन् जगृहे गन्धहस्तिनः॥ २२.१५३ ॥

प्रतियुध्य परिश्रान्तान् गृहीत्वा गजयोधिनः।
चक्रलिङ्गधरांश्चक्रे कालिङ्गान् किङ्करीकृतान्॥ २२.१५४ ॥

स तेषामपि सामन्तानाहूतान्विध्यदुर्गतः।
दक्षान् द्विरदशिक्षायां चक्रे निजनिषादिसात्॥ २२.१५५ ॥

वैरिवारणमूर्धन्यैर्मौक्तिकैर्लाजतां गतैः।
रणाग्निर्दर्शयामास व्यूढां तेन जयश्रियन्॥ २२.१५६ ॥

दारितद्विरदांस्तत्र सिंहानिव महाजवान्।
ननन्द स्वभटान् दृष्ट्वा नखरश्रितमौक्तिकान्॥ २२.१५७ ॥

विपक्षान् भूभृतस्तत्र कुर्वता निर्विचेष्टितान्।
देवो हरिहयस्तेन द्विरूपत्वमिवान्वभूत्॥ २२.१५८ ॥

अपर्युषितपानीयामनघस्रोतसं शुभाम्।
गङ्गामिव विभक्ताङ्गीं प्राप गोदावरीं ततः॥ २२.१५९ ॥

अशालिनमनस्त्वेऽपि स्वाश्रितत्राणमिच्छताम्।
आन्ध्राणामात्मदातॄणां ददावभयदक्षिणाम्॥ २२.१६० ॥

पतिरक्षणतुष्टानां स्वगुणग्रथिताक्षरैः।
आन्ध्रेश्वरपुरन्ध्रीणां सङ्गीतैः प्रत्यनन्दत॥ २२.१६१ ॥

आद्यं द्रमिडदेशानां तुण्डीरमथ मण्डलम्।
विवेश भूषितं यूपैर्वेधसो वाजिमेधिकैः॥ २२.१६२ ॥

क्षिप्तदोषः स तं देशं क्षीरसिन्धुगुणाधिकम्।
शुद्धधर्मपरिष्कारं श्वेतद्वीपममन्यत॥ २२.१६३ ॥

परित्यक्तपथांस्तत्र स काञ्चीकटकत्यजः।
आहूय स्थापयामास धर्म्यान् धर्मधुरन्धरः॥ २२.१६४ ॥

प्रलोभयन्तीं ललितैस्ततः प्रथमलक्षितैः।
दर्शनीयेषु चोलेषु दिदृक्षामन्ववर्तत॥ २२.१६५ ॥

अथ कन्यां कवेरस्य ददर्श कनकाश्रिताम्।
अपदिष्टनदीरूपाममृतस्येव देवताम्॥ २२.१६६ ॥

उदारलहरीलास्यां ललितावर्तरासिकाम्।
रसिकः प्रैक्षत नदीं रङ्गपर्यन्तनर्तकीम्॥ २२.१६७ ॥

रथसेतुनिरुद्धा सा रत्नाकरमनोरथात्।
अवरुह्य जगामेव सह्यस्य पितुरन्तिकम्॥ २२.१६८ ॥

दक्षिणापथगङ्गायाः स तस्या दिव्यसम्पदः।
ददौ रविसुताश्लेषं दानवर्षेण दन्तिनाम्॥ २२.१६९ ॥

जननीमिव तां लक्ष्म्याः पाथोनिधिपतिव्रताम्।
नियमैरुचितैर्भेजे निगमख्यातवैभवाम्॥ २२.१७० ॥

यशोभिः सह चोलानामिक्षुनिष्यन्दसंनिभम्।
पयः सह्यपयस्विन्याः पपुर्यादवयूथपाः॥ २२.१७१ ॥

जहसुर्जागरूकास्ते जङ्गालगुणशालिनाम्।
दृष्ट्वा द्रमिडयोधानामवस्कन्दमनोरथम्॥ २२.१७२ ॥

त्रिविष्टपनिभांस्तत्र दृष्ट्वा जनपदान् बहून्।
अचमत्कारमन्येषु भूमिभागेष्वधत्त सः॥ २२.१७३ ॥

तत्र दर्पममित्राणां मित्राणामपि साध्वसम्।
अखण्डयदपर्यायादत्याखण्डलविक्रमः॥ २२.१७४ ॥

रङ्गमात्मभुवस्तत्र रम्यनिर्माणमातृकाम्।
अनन्तपीठिकारूढमभ्यर्च्य मुदितो ययौ॥ २२.१७५ ॥

दिवाऽपि दीपसापेक्षं गहनं संश्रितान् गजैः।
स चोरांश्चूर्णयामास चोलपाण्ड्योपघातिनः॥ २२.१७६ ॥

रम्यपत्तनसम्बाधां रत्नसैकतशोभिनीम्।
व्यलोकयत सम्प्रीतो वेलाविपिनपद्धतिम्॥ २२.१७७ ॥

मैनाकमहसा दीप्तं सेतुसीमन्तितोदकम्।
दमितं रघुवीरेण ददर्शाब्धिं स दक्षिणम्॥ २२.१७८ ॥

परिखां प्रेक्ष्य लङ्कायाः पयोधिं प्रजहर्ष सः।
ताराभूषितदेहस्य त्रिदिवस्येव दर्पणम्॥ २२.१७९ ॥

सहसोत्पततां तत्र धन्विनो लघुविक्रमाः।
उदधिं दन्तिनक्राणां कुम्भरत्नैरपूरयन्॥ २२.१८० ॥

गगनं च निरालम्बमगाधं च महोदधिम्।
वीक्ष्य ते बह्वमन्यन्त हनूमन्तं गतागतम्॥ २२.१८१ ॥

स भेजे सरितां पत्युः पुलिनं वृष्णिपुङ्गवः।
आसीदविधवा गङ्गा प्रसन्नो यत्र राघवे॥ २२.१८२ ॥

व्यलोकत च विस्मेरो लङ्कागोपुरमुत्तरम्।
रघुवीरशरव्रातपरिकल्पितजालकम्॥ २२.१८३ ॥

परिभूतरवस्तस्य सैन्यघोषेण सागरः।
अधिकं क्षोभमापन्नस्त्रासभिन्न इवाभवत्॥ २२.१८४ ॥

तमालान् प्रतिमातङ्गत्रासादालानमण्डलान्।
ममृदुर्नूनमावार्य मदान्धा गन्धसिन्धुराः॥ २२.१८५ ॥

नलसेतुं ततो नीत्वा दृष्टमुक्तानदीमुखः।
वीरो विश्रमयामास दुर्निवारां वरूथिनीम्॥ २२.१८६ ॥

कृतव्यावर्तनास्तत्र केतकीरेणुरूषिताः।
द्विषः स्कन्धांश्च दुधुवुर्हयास्तुमुलहेषिताः॥ २२.१८७ ॥

धनुषा शार्ङ्गभीमेन सामिविष्फारितेन सः।
लज्जितोदधिघोषेण लङ्काद्वीपमकम्पयत्॥ २२.१८८ ॥

प्रतापद्रुतवशगाः प्राज्यरत्नोपहारिणः।
अजीवन् यदुसिंहस्य पादमाश्रित्य सिंहलाः॥ २२.१८९ ॥

महतीमुपदां तेषां द्विपरत्नादिशालिनीम्।
स सङ्गृह्य पुनश्चक्रे न मनः सेतुबन्धने॥ २२.१९० ॥

द्विरदान् सिंहलेन्द्रस्य द्विचतुर्दन्तशोभिनः।
पोतभूतांस्त्रिकूटस्य पोतानीतानमन्यत॥ २२.१९१ ॥

यशोरत्नाकरस्तस्य बभौ पाण्ड्यसमर्पितैः।
सैन्यकञ्चुकपर्याप्तैर्मुक्तापुलिनमण्डलैः॥ २२.१९२ ॥

सोमवंशभुवां तत्र भूभृतां यदुपुङ्गवः।
सयूथ्यभावमुद्भाव्य शङ्काज्वरमपानुदत्॥ २२.१९३ ॥

स मारुति पदन्यासादञ्चिताग्रामधित्यकाम्।
प्रभुः प्रदक्षिणीचक्रे महेन्द्रस्य महीभृतः॥ २२.१९४ ॥

उपभुक्ता बभौ तेन मलयस्य वनस्थली।
सैन्यसम्मर्दसम्भूतैरेलाचन्दनसौरभैः॥ २२.१९५ ॥

पतगेन्द्रध्वजत्रासाद्भ्रष्टकुण्डलितात्मनाम्।
जगृहुर्यादवास्तत्र फणारत्नानि भोगिनाम्॥ २२.१९६ ॥

पृतनां तस्य सम्प्रेक्ष्य पृषद्भावितसागराम्।
मानमात्मनि तत्याज मलयाश्रमतापसः॥ २२.१९७ ॥

मरुतस्तत्र नागानां मृदितैलासुगन्धयः।
चन्दनद्रुमसक्तानां प्रीतिकोपकृतोऽभवन्॥ २२.१९८ ॥

पटीरस्कन्धविषयास्तत्र तेषां भुजङ्गमाः।
अभजन्त फणारत्नैरवातक्षोभदीपताम्॥ २२.१९९ ॥

मुक्ताभरणभूयिष्ठा रत्नचन्दनरञ्जिता।
चकाशे यादवी सेना सतारेव पितृप्रसूः॥ २२.२०० ॥

निदाघमिव पर्जन्यो निरासे सात्यकिः परम्।
प्रयुक्तैरग्रतो नागैः प्रावृषेण्यैरिवाम्बुदैः॥ २२.२०१ ॥

युगपत्प्रत्यविध्यन्त युद्धे तस्य शरैर्द्विषः।
अपाङ्गैश्च सुरस्त्रीणामसितोत्पलमेचकैः॥ २२.२०२ ॥

शस्त्रकेलिं परित्यज्य स्वकान्ताकेश भङ्गुराम्।
जगृहुः केरलास्तत्र जैत्रमस्त्रमिवाञ्जलिम्॥ २२.२०३ ॥

अदूरावस्थितो रामस्तत्र वृष्णिवरूथिनीम्।
शशङ्के विस्मयाविद्धः सप्तार्णवसमाहृतिम्॥ २२.२०४ ॥

भुग्नभागस्ततः सह्यस्तदाक्रमणयन्त्रितः।
प्रणिनंसुरिवाबोधि पर्यस्तशकटोपमः॥ २२.२०५ ॥

अग्रस्कन्धेन गोकर्णं महेन्द्रमपि मूलतः।
अवस्कन्द्य यदुश्रेष्टः स्कन्धावारं न्यवीविशत्॥ २२.२०६ ॥

जित्वा सह्याश्रितं वीरो जामदग्न्य इवापरः।
दूरमुत्सारयामास द्विषद्बलमहार्णवम्॥ २२.२०७ ॥

चारुचन्दनसम्पन्नां शैलस्तनमनोहराम्।
बुभुजे दक्षिणामाशां मौक्तिकाकरमेखलाम्॥ २२.२०८ ॥

तत्र वेलानिलोद्धूतराजतालरवान्वितम्।
स्वर्गीतं स्वादु शुश्राव भुजाङ्गस्त्रीमुखोदितम्॥ २२.२०९ ॥

चोलकेरलपाण्ड्यानां पश्यन्ननुगतिं प्रभुः।
चकार पुनराधानं धर्म्यं हुतभुजामिव॥ २२.२१० ॥

कालदृष्टिकरालाभिरुल्काभिरिव हेतिभिः।
दुर्मदद्विरदोदग्रान् त्रासयामास तौलुवान्॥ २२.२११ ॥

खेटकर्परगूढाङ्गान् कीलयित्वा शरैर्द्विषः।
स्थलकूर्मैरिवाकीर्णं चकार रणभूतलम्॥ २२.२१२ ॥

शरैरभ्यर्चितास्तेन कोङ्कणाः समराङ्गणे।
पुष्पवृष्टिभिरानर्चुस्तमेव त्रिदशीकृताः॥ २२.२१३ ॥

कुपिताः कोङ्कणस्त्रीणां गण्डूषमधुगर्भितान्।
बभञ्जुरमितामोदान् वकुलान् वृष्णिकुञ्जराः॥ २२.२१४ ॥

प्रमादानिव तान् सप्त देशानतिपतन् प्रभुः।
स ममर्द महाराष्ट्रां सैन्यदक्षिणभागतः॥ २२.२१५ ॥

अपश्यदृश्यमूकान्ते शेषमौलिमणिप्रभाम्।
रामसायकरन्ध्रेण निः सरन्तीं नभः स्पृशम्॥ २२.२१६ ॥

कामक्रोधाविवास्कन्द्य सह्यविन्ध्यौ समाहितः।
विजिग्ये विषमांस्तत्र विषयान् सत्त्वमास्थितः॥ २२.२१७ ॥

चापघोषेण निर्भिन्नचक्रवालाद्रिसन्धिना।
कुञ्जलीनान् द्विषस्तत्र दिवाभीतानभेषयत्॥ २२.२१८ ॥

अवन्ध्यतपसा विन्ध्यः स्तम्भितः कुम्भजन्मना।
यदुपुङ्गवमातङ्गैर्वर्धमान इवाभवत्॥ २२.२१९ ॥

सूर्यरोधितरुच्छन्नामसूर्यम्पश्यवीचिकाम्।
सोमवंश्याः सुधां तत्र पपुः सोमसमुद्भवाम्॥ २२.२२० ॥

तेषां विहरतां तत्र शिञ्जिनीबद्धरावणाम्।
कार्तवीर्यजलक्रीडां कथयन्ति स्म तापसाः॥ २२.२२१ ॥

नगरीं हेहयेन्द्रस्य कारार्पितदशाननाम्।
नलादीनां च शिथिलां सनिर्वेदमदर्शयन्॥ २२.२२२ ॥

रथवाजिपदक्षुण्णविन्ध्यमस्तकरेणुभिः।
रेवामाचामयामास रिपुस्त्रीबाष्पवर्धिताम्॥ २२.२२३ ॥

ववृधे समरस्तत्र सुभगस्वर्गसङ्क्रमः।
सिद्धगन्धर्वयूथानां चित्तताण्डवदेशिकः॥ २२.२२४ ॥

स्फुलिङ्गैः खड्गनिष्पिष्टदन्तदम्भोलिसम्भवैः।
आसीद्द्विरदमेघानामचिरद्युतिकल्पना॥ २२.२२५ ॥

सव्यालमृगसङ्कीर्णा रम्यतुङ्गरथद्रुमा।
विससर्प चमूस्तत्र विन्ध्यवन्येव जङ्गमा॥ २२.२२६ ॥

तालद्वयसजङ्घाग्र्याः कुम्भैरुत्तम्भिताम्बराः।
गर्जितैस्त्रासयामासुर्गजा वनमतङ्गजान्॥ २२.२२७ ॥

बलयन्त्रणया तत्र गृहीतैर्विपिनद्विपैः।
व्यवर्धयत तां सेनां विन्ध्यपादैरिवोन्नतैः॥ २२.२२८ ॥

यूथैर्द्विरदशैलानां कनत्कदलिकावनैः।
अन्तरं पूरयामास विन्ध्यनीहारभूभृतोः॥ २२.२२९ ॥

अरातिवनितानेत्रैरश्रुधाराधरैरिमाम्।
वीरो वसुमतीमित्थं विदधे देवमातृकाम्॥ २२.२३० ॥

धर्मयूपनिभैस्तस्य जयस्तम्भैः समन्ततः।
प्ररूढाद्भुतरोमाञ्चा प्रत्यभासत मेदिनी॥ २२.२३१ ॥

जिताशेष विपक्षस्य बद्धमुक्तावभासिनी।
अभवत्ककुभां तस्य कीर्तिः श्रवणभूषणम्॥ २२.२३२ ॥

इति ग्राह्यकराश्चक्रे हरितो हरितोषकृत्।
वीरः सुरभिणा स्वेन यशसाऽऽवासिताम्बराः॥ २२.२३३ ॥

हृतसर्वस्वदीनानां व्रीडामपनुदन्निव।
अदिशत् क्षौममाशानां यशोभिर्हंसलक्षणैः॥ २२.२३४ ॥

स चक्रवत् परिक्रम्य क्ष्माचक्रमरिन्दमः।
क्षपयित्वा रिपून् सर्वान् शौरिपार्श्वं पुनर्ययौ॥ २२.२३५ ॥

सैन्यसिन्धुपथस्तस्य स्थलीशेषितकण्टकः।
विदधे विस्मयोन्निद्रप्रीतिकण्टकितां भुवम्॥ २२.२३६ ॥

तमेवमखिलामाशां परिक्रम्योदयस्थितम्।
प्रद्योतनसमं पौराः प्रहृष्टाः प्रत्युपासत॥ २२.२३७ ॥

सैन्यघोषसमाहूतौ ततो हरिहलायुधौ।
तमभ्याजग्मतुर्दूरादुग्रसेनपुरोगमौ॥ २२.२३८ ॥

ददृशे सात्यकिस्तत्र राममुख्यैः सराजकः।
अन्यैः सह दिशापालैराखण्डल इवापरः॥ २२.२३९ ॥

अभिवन्द्य स तान् वन्द्यानभिव्यक्तपराक्रमः।
तदनुप्लवभावेन प्राविशद्द्वारकां पुरीम्॥ २२.२४० ॥

प्रस्थितौ परिमेयानि पश्चादुपचितानि सा।
जग्रसे यदुसैन्यानि जगन्तीव हरेस्तनुः॥ २२.२४१ ॥

अष्टासु दिक्षु विभवैरुपसङ्गृहीतैः
    यक्षास्पदप्रहसनी यदुराजधानी।
सत्यानुभाववसुदेवसुतप्रसत्त्यै
    सम्भूतदिक्पतिविभूतिरिवाबभासे॥ २२.२४२ ॥

अभ्यर्च्य पूर्वविभवादधिकैः प्रदिष्टैः
    नाकाधिपानिव नवोपहृतान्नरेन्द्रान्।
धर्मानुपालननियोगनिरूढचित्तान्
    प्रास्थापयत् प्रतिदिशं प्रथमो यदूनाम्॥ २२.२४३ ॥

मणिमकुटसहस्रैर्वासुदेवस्य भूपाः
    पदसविधनिषण्णां पादुकामर्चयित्वा।
प्रतिययुरुपलब्धैः पारिजातप्रसूनैः
    सुरभयितुमुपेत्य स्वावरोधान् प्रसाद्यान्॥ २२.२४४ ॥

॥ इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य
कृतिषु यादवाभ्युदये माहाकाव्ये
द्वाविंशः सर्गः॥